2018 VI 19 | 0230 | Seat No. : [ ][ ][ ][ ][ ]

Time : 1½ Hours

SANSKRIT COMPOSITE (S.L.)

Subject Code

| S | 1 | 6 | 3 |
|---|---|---|---|

Total No. of Questions : 5 (Printed Pages : 6) Maximum Marks : 40

***INSTRUCTIONS*** : *i) सर्वेषां प्रश्नानाम् उत्तराणि नवीनपृष्ठे लेखनीयानि ।*

*ii) प्रश्नानाम् क्रमाङ्काः, उपप्रश्नानाम् अक्षराणि स्पष्टतया लेखनीयानि ।*

*iii) सर्वे प्रश्नाः अनिवार्याः सन्ति ।*

*iv) सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः ।*

*v) दक्षिणभागे दार्शिताङ्काः गुणाङ्काः सन्ति । (स्वभाषा नाम–हिंदी, मराठी, कोंकणी आङ्गलभाषा च ।)*

## प्रथमखंडः (पठितावबोधनम्)

1. क) अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत । **[3]**

अथ प्रसन्न : माधवः स्वधेनुम् अहर्निशं असेवत् । सः तस्याः रज्जुं धृत्वा तस्मै तृप्तिपर्यन्तं धासादिकं अयच्छत्, जलं अपायतत्, विषाणयोः तैलं अकरोत् । प्रातः सायं च तां तिलकं अकरोत् । कदाचित् गुडादिकमपि अभोजयत् । स सर्वदा चिन्तयति स्म "एकवारं ग्रहीष्यामि पयोऽस्या प्राज्यमुत्सवे" ।

**प्रश्ना :**

अ) **एक**वाक्येन उत्तरत ।

1) माधवः धेनुं कदा तिलकं अकरोत् ?

2) कदाचित् सः किम् अभोजयत् ?

3) माधवः सर्वदा किं चिन्तयति स्म ?

ख) अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत । **[2]**

कुसुमं वर्णसम्पन्नं गन्धहीनं न शोभते ।
न शोभते क्रियाहीनं मधुरं वचनं तया ।।
न सदा गुरुसान्निध्यं पिता कार्यान्तराकुलः ।
माता पाकादिषु व्यग्रा तस्मात् वाचनमाश्रयेत् ।।

**प्रश्ना :**

अ) **एक**वाक्येन उत्तरत ।

1) कीदृशं वचनं न शोभते ?

2) अन्येषां सान्निध्याभावे छात्रः किम् आश्रयेत् ?

ग) **एकस्य** गद्यखण्डस्य अनुवादं स्वभाषया लिखत । **[2]**

अ) अत्र अनेके उत्सवाः प्रचलन्ति । तेषु महाशिवरात्रिः चैत्रपौर्णिमा एतौ उत्सवौ प्रसिद्धौ । अधुना एतत् शिखरं पर्यटन दृष्ट्यापि विकसितं जातम् । अनेके गोमन्तकीयाः श्रद्धयाः प्रतिवर्षम् अत्रागच्छन्ति प्रार्थयन्ति च ।

आ) सलीमः – एतेषां त्रयाणाम् वर्णानाम् अत्र विशेषः अभिप्रायः ।

देवेशः – कः विशेषः ?

सलीमः – शृणु, केशरवर्णः शौर्यस्य, श्वेतः शान्तेः, हरितश्च समृद्धेः सूचकः अस्ति । स्वयं च अयं ध्वजः अनेकत्वे एकत्वस्य द्योतकः ।

घ) वाक्यांशयोः मेलनं कृत्वा लिखत । **[1]**

1) जलेन कृषीवलाः – प्रभूतं धनं अर्जयन्ति ।

2) स्वार्थपराः जनाः – क्षेत्राणि सिञ्चन्ति ।

– मम जलं प्रदूषयन्ति ।

2. ङ) **एकस्य** पद्यखण्डस्य अनुवादं स्वभाषया लिखत । **[2]**

अ) शतेषु जायते शूर: सहस्त्रेषु च पण्डित: ।
वक्ता दशसहस्त्रेषु दाता भवति वा न वा ।।

आ) वृथाभ्रमणकुक्रीडा परपीडापभाषणै: ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ।।

च) **एकस्य** प्रश्नस्य उत्तरं स्वभाषया लिखत । **[2]**

अ) बान्दोडकर महोदय: छात्राणां कृते किम् अकरोत् ?

आ) माण्डवीनद्या: विविधा: उपयोगा: के भवन्ति ?

छ) पूर्णवाक्येन संस्कृतभाषया उत्तरं लिखत । **[2]**

अ) मुळस इति स्थाने कस्य मन्दिरमस्ति ?

आ) भाऊसाहेब: के क्रीडे क्रीडति स्य ?

ज) सुभाषितं शुद्धं पूर्णं च लिखत । **[2]**

बालो वा यदि ________________ ।।

## द्वितीयखंड: (अपठितावबोधनम्)

3. झ) अध: दत्तं गद्यखण्डं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **[3]**

मयूर: अतीव मनोहर: मोहक: च । तस्य ग्रीवा नीला उन्नता च । तस्य मस्तके मनोरमा चूडा अस्ति । परन्तु तस्य पादौ कुरुपौ दीर्घौ च । तस्य पिच्छकलाप: गुर: दीर्घ: च । प्रत्येकस्मिन् पिच्छे विविधा: वर्णा: सन्ति । स: वने वसति धान्यकणान् कीटक सर्पादीन् च खादति । स: सुन्दर: दृश्यते । मयूर: भारतवर्षस्य राष्ट्रिय: पक्षी ।

**प्रश्ना :**

अ) **एक**वाक्येन उत्तरत ।

1) मयूरस्य मस्तके किम् अस्ति ?

2) स: किम् खादति ?

3) मयूरस्य विशेष: क: ?

ञ) **एकं** परिच्छेदं स्वभाषया अनुवदत । **[3]**

अ) एषः कृषीवलः। गोपालः इति तस्य नामधेयम्। गोपालः प्रभाते क्षेत्रम् गच्छति। बलीवर्दानाम् साहयेन एषः हलेन भूमिम् कृषति बीजानि वपति च । तस्मात् सः सस्यानि विन्दति । अतीव श्रमपूर्णम् तस्य जीवनम् ।

आ) श्री गणेशः विद्यायाः देवता । महादेव शंकरः तस्य जनकः, पार्वती तस्य जननी, कार्तिकेयः च बन्धुः । तस्य मुखम् गजस्य मुखम् इव, अतः सः गजाननः इति विख्यातः । छात्राः विद्यारम्भे गणपतिम् सरस्वतीम् च प्रणमन्ति । ग्रामे ग्रामे नगरे नगरे च श्री गणेशस्य मन्दिराणि भवन्ति । श्री गणेशस्य वाहनम् मूषकः ।

## तृतीयखंडः (व्याकरणम्)

4. ट) रिक्तस्थानेषु उचितानि पदानि कोष्ठकात् चित्वा लिखत । **[2]**

अ) पर्वतशिखरं ____________ शोभते ।
(मन्दिरेण/मन्दिरं)

आ) ____________ स्मरणार्थं सागरतटे स्मारकं शोभते ।
(एषः/तस्य)

ठ) सूचनानुसारं **द्वयोः** वाक्ययोः परिवर्तनं कृत्वा लिखत । **[2]**

अ) सः सहाय्यम् अकरोत् ।
(लट् लकारे (वर्तमानकाले) परिवर्तयत)

आ) अस्मिन् ध्वजे (3) वर्णाः सन्ति ।
(संख्यावाचि पदं लिखत)

इ) सह्याद्रेः आधित्यकातः अहं अधः वहति ।
(वाक्यं संशोध्य लिखत)

ई) बालकाः प्रथमं सिद्धेश्वरदर्शनार्थं गच्छन्ति ।
(वाक्यं एकवचने परिवर्तयत)

ड) रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत । **[2]**

अ) पर्वतस्य दक्षिणे कोणे भूतनाथशीला अस्ति ।

आ) सा माधवहस्ते पात्रम् अपश्यत् ।

ढ) तालिकायां रिक्तस्थानेषु समस्तपदम् विग्रहवाक्यम् समासनाम वा लिखत । **[2]**

| | **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|---|
| अ) | _________ | सोपानानां मार्गः | षष्ठी तत्पुरुष |
| आ) | अदोहनात् | न दोहनात् | _________ |

ण) विलोमपदानि लिखत । (**एकम्**) **[1]**

अ) शीतम् ।

आ) अग्रजः।

त) पर्यायपदानि लिखत । (**एकम्**) **[1]**

अ) पर्वतः ।

आ) लोचनम् ।

## चतुर्थखंड : (रचना)

5. थ) कोष्ठकात् उचितपदानि चित्वा द्वे सार्थकवाक्ये लिखत । **[2]**

| | | | |
|---|---|---|---|
| अ) | गायकाः | नक्षत्राणि | गायन्ति । |
| आ) | गगने | अभ्यासं | करोति । |
| इ) | छात्रः | गीतम् | सन्ति । |

द) मञ्जूषातः उचितानि पदानि चित्वा संवादपूर्तिं कृत्वा लिखत । **[4]**

(होराद्वयम्, चित्राणि, रविवासरे, शोभनम्)

राधा – सखि अद्य _________________________ कुत्र गन्तुम् उद्यता असि ?

मेधा – प्रतिरविवासरम् अहं _________________________ अशिक्षिताः पुरुषान् स्त्रियः पाठयामि ।

राधा – एतत् तु __________________ कार्यम् । तत्र त्वं किं किं करोषि ?

मेधा – साक्षरतायाः लाभान् उक्त्वा अक्षरज्ञानं प्रति रूचेः वर्धनार्थं प्रयासः क्रियते ।
ततः __________________ दर्शयित्वा अक्षरज्ञानं कार्यते ।

ध) चित्रम् आधृत्य **चत्वारि** वाक्यानि लिखत । **[2]**

(उद्यानम्, अधोगामिनी, क्रीडासाधनानि, वृक्षः, दृश्यते, दोला, पुष्पाणि, बालाः, क्रीडन्ति)

